*Journal of Advances and Scholarly Researches in Allied Education*
*Vol. 16, Issue No. 6, May-2019, ISSN 2230-7540*

# श्रीमद्भगवद्गीता तथा कुरान मध्ये विश्व बन्धुत्वस्य भावना

**Rajender Kumar Saini***

Research Scholar, Rashtriya Sanskrit Sansthan, Deemed University, Janak Puri, New Delhi

***सारांश: - श्रीमद्भगवद्गीता तथा कुर्आन उभौ एव एतादृशौ ग्रन्थौ स्तः। अनयोः ग्रन्थयोः एव समाज सुधरस्य प्रेरणा प्रतिवदे प्राप्यते। श्रीमद्भगवद्गीता न केवलं समाजोद्धारकरूपेण प्रसिद्धम् अस्ति अपितु मोक्षदायक रूपेण अपि परिगण्यते। अस्मिन् ग्रन्थे स्वयं श्रीकृष्णः उपदेशं ददाति। अर्जुनः तस्य विराटरूपस्य दर्शनं करोति। अत्रा प्रेरणादायकाः श्लोकाः वर्तते। एतेषु श्लोकेषु स्पफूर्तिः आजायते। विश्वबन्धुत्वस्य भावनाया दर्शनं प्राप्यते अत्रा। एषः ग्रन्थः संसारस्य कल्याणमिच्छति।***

***श्रीमद्भगवद्गीतायां, कुर्आने च विश्वबन्धुत्वस्य दर्शनं भवति।***

***उभयोः एवः परस्परं आन्योन्याभावं दृश्यते।***

---------------------------------x---------------------------------

**विश्वबन्धुत्वस्य प्रत्यक्ष प्रमाण ईश्वरः एव अल्लाहः इत्यनयोः एकरूपता च-**

एतत् सर्वविदितमस्ति यत् सर्वे जनाः पृथक् पृथक् नामभिः तस्य एकस्यैव अखण्ड मण्डलाकारस्योपासना कुर्वन्ति। किन्तु पृथक् पृथक् भाषया पृथक् पृथक् कारणात् तं परमेश्वरं बहवः अज्ञानीपुरूषाः पृथक्-पृथक् अवगच्छन्ति स्वीकुर्वन्ति वा। किन्तु सः तु एकः एव अस्ति। प्रमाणमेतत् संसारस्य दिव्यग्रन्थ वेदेषु तथा कुरआने ईश्वरस्य एकतायोः वर्णनं स्पष्ट रूपेण प्राप्यते। अनेन सह एव संसारस्य धर्मावलम्बिनः ईश्वरस्य एकरूपतां स्वीकुर्वन्ति। तस्योदाहरणानि द्रष्टव्यानि सन्ति -

**ऋग्वेदः -**

1. ‘‘य एक इत् तमुष्टि ही’’ 6/45/16

   अर्थात् सः एव एकः अस्ति तस्योपासना एव कुरू।

2. ‘‘मा चिदन्यद विशंत’’ 8/1/1

   अर्थात् कस्यापि अपरस्य ईश्वरस्य पूजां उपासनां वा मा कुरू।

3. जबूर (यहूदी धर्म ग्रन्थ) मम शिला मम दुर्गः केवलं त्वमेव असि। हे पुभो! माम् दुष्टस्य हस्तेन मोचयतु। यतोहि त्वमेव मम आशावर्तते। 71/3/4

4. बइबिल (इन्जील) अस्य ग्रन्थस्य अनेकेषु प्रसंगेषु एकस्य ईश्वरस्य चर्चाऽस्ति। यहुदाहस्य पत्रोण स्पष्टरूपेण ईश्वरस्य अद्वैत बुद्धिमान् संज्ञा दत्ता।

5. आदिगुरू शंकराचार्यः अकथयत् यत् ‘‘एको ब्रहम द्वितीयोनास्ति।

   अर्थात् एकः एव परब्रहम परमेश्वरः अस्ति न कोऽपि द्वितीयः।

6. गुरू नानकः तस्यैव एकस्य परमेश्वरस्य अनकेषु रूपेषु स्तुतिः अकरोत् -

**‘‘एक ओंकार सतनाम करता**

**पुरखु निर्भऊ निर्वैरू**

**अकाल मूरति से भंगुर**

**प्रसाद जपु आदि सचु जुगदि सचु,**

www.ignited.in

**है भि सचु नानक होसिभि सचु।''**

अर्थात् एकः एव ओमकार नामको परमेश्वरः अस्ति, यः एव सत्योऽस्ति। न तस्य कोऽपि शत्रुः न सः कस्मादपि विभेति। सः सर्वदा समानरूपेण वसति। सः स्वयंभू वर्तते। यः संसारे पुराऽपि सत्यरूपेण विद्यमानम् आसीत्। संसारस्य समाप्ति पश्चात् अपि तत एव सत्यम् विद्यमानं भविष्यति। यत् किमपि विद्यमानमस्ति तदपि सत्यमस्ति यत् विद्यमानं भविष्यति यत् अपि सत्यमेव अस्ति।

इत्थं इस्लाम धर्मः तु एकमात्रा ईश्वरस्य एकतायामेव विश्वासं धरयति। पवित्रा कुर्आने ईश्वरस्य एकरूपता विषये विभिन्नाः तर्काः दत्ताः। ईश्वरस्य अल्लाहस्य एकरूपताविषये कथितमस्ति यत् -

**''कुल होव ल्लाहु अहद अल्लाहु स्समद लम यलिद्**

**व लम यूलद वलम् यकुल्लहु कुपफूवन अहद''**

अर्थात् भो दवेदूत् (पैगम्बर) कथयत् यत् ईश्वरः एकः एव अस्ति। ईश्वरः निस्पृहः अस्ति। अर्थात् तं कस्यापि वस्तुनः अभिलाषा न वर्तते। न तस्य पाश्र्वे कस्यापि न्यूवता वर्तते। न कोऽपि तं अजनयत्। सः स्वयंभूः अस्ति। नैव तस्य सादृशं वर्तते। सः कल्पनातीतः वर्तते।

इत्थं -

**''व इलहुकुम इलाहुन वाहिदुन लाइलाह इल्लाहुवर्रहमा निर्रहीम''[1]**

अर्थात् - युष्माकं पूजनीयः अल्लाहः एव अस्ति सः तु एकाकी एव वर्तते। तस्मादतिरिक्तः कोऽपिनास्ति। सः एव दयावान् अस्ति।

इत्थं संसारस्य सत्यधर्मेषु तस्य एकस्य एव प्रभोः उपासना, तस्योपरि विश्वासः तस्य सर्वसमर्थतायोपरि इद् विश्वासः अस्ति।

परमेश्वरः मनुष्यं यदा धरायां अवातारयत् तदा तस्य समक्षं विकल्प द्वयम् अस्थापयत्

यत् -

**''शुक्ल कृष्णे गती ह्येते जगतः शाश्वते मते।**

**एकया यात्यनावृत्तिमन्यया वर्तते पुनः।।''[2]**

अर्थात्-ईश्वरः संसारस्य रचना समये एव सदसत्, सद्गुण निर्गुण, दिवारात्रि, कृष्णः श्वेत, इत्यादीनाम् रचना अपि अकरोत्। सहैव असत्य क्षणभंगुरं संसारं एतावत् आकर्षकः रोचकः मनमोहकः वा निर्मितवान् येन असत्यवादिनः अज्ञानयः असह्य असत्य संसारस्य अभिलाषायाम् इतस्ततः भ्रमितुं प्रारब्धम्। यः कोऽपि संसारस्य स्वमिनं जगदीश्वरं उपेक्षां करोति, सः सर्वदा मोहात् ग्रस्तो भवति।

परिणामतः अधिकस्य अभिलाषायां सः विस्मरति यत् तस्य सदृशाः अन्येऽपि बान्धवाः सन्ति। अद्यतनं तु स्वार्थपरतया समाजे हत्या चोरी, अत्याचारं अनाचा, आतंकवादः, उग्रवादः इत्यादयः वृद्धि कुर्वन्ति। समाजे स्नेहस्य चिह्नमपि नैव दृश्यते। एतेषु एव ज्ञानवन्तः सन्ति जनाः। ये संसारे असत्यं नश्वरः क्षणभंगुरः वा स्वीकुर्वन्ति। एतत् ज्ञात्वा तस्य त्यागपूर्वकेण उपेक्षापूर्वकेण वा उपभोगं कुर्वन्ति तथा निष्ठापूर्वक तं प्रभुं प्रसन्न करणे एव संलग्नाः भवन्ति, यस्य अयं संसारः अस्ति। तस्य परम प्रभोः कृपया एतत् ज्ञानं भवति यत् एषः संसारः माम् पुनः न प्राप्स्यति तथा इमं त्यक्त्वा एकस्मिन् दिवसे तु गन्तव्यमेव।

अपरतः सः क्षणमात्रामपि परम प्रभोः दूरं नैव गच्छति। इत्थं जनाः संसारे एव भ्रमन्ति। किन्तु यः ईश्वरं भजति सः सदैव ईश्वरस्य समीपं भवति। मानवसृष्टिकालात् एव समये-समये सत्य धर्म ग्रन्थाः मानवसमाजाय सत्य संदेश द्रष्टाभिः प्राप्यन्ते। यदि अस्माकं पाश्र्वे लेशमात्रामपि विवेकः अस्ति तर्हि वयं इदं विचारयितुं शक्नुमः यत् संसारे असंख्याः सत्य धर्म ग्रन्थाः सन्ति तेषु अनेकाः समानताः स्वयमेव प्राप्यन्ते। याः वास्तविकतायाः प्रमाणानि सन्ति। अनेन अयमेव सि(ति यत् संसारस्य नियन्तायाः निर्देशः एव एतेषु ग्रन्थेषु विद्यमानमस्ति। सर्वे ग्रन्थाः समादरणीयाः पूजनीयाः सन्ति यतोहि सर्वेषु ग्रन्थेषु मूलवार्ता तु एका एव भवति। ईश्वरं विना अस्माकं सत्ता न भवति। सः एव अस्य सृष्ट्याः रचयिता, पालकः संहारकः वा भवति।

सः एव परमाशक्तिः अस्ति येन सर्वे प्राणयः यन्त्रावत् कार्यं कुर्वन्ति। तस्य सृष्टिरपि उत्कृष्टा अस्ति तस्याः नियमानि अपि कठोराणि सन्ति। यः जनः एतेषाम् नियमानाम् पालनं नैव करोति तं ईश्वरः सृष्टिः च मिलित्वा एव दण्डं यच्छत्। इत्थं सर्वेषु धर्मग्रन्थेषु समानताः दृश्यते।

अस्मिन् सन्दर्भे एव अल्लाहः कथयति -

**''कुल या अह लल् किताबि तआलौ इला,**

www.ignited.in

**क्लिमतिन् सवाइम् वैनना वं बैनकुम्।''[1]**

अर्थात् भो पैगम्बरः एतत् कथय यत् हे ईश्वर प्रदत्त धर्म ग्रन्थयुक्ताः जनाः! आगच्छन्तु वयं सर्वे मिलित्वा तं परमेश्वरं प्रार्थयामः तस्योपासनां कुर्मः यतो तत् सदृशोः नास्ति अस्मिन् संसारे कोऽपि अन्यो।

**''न तस्य प्रतिमा अस्ति, यस्य नाम महद्यशः।''**

अर्थात् तस्य ईश्वरस्य कोऽपि प्रतिमानो नास्ति। तस्य नाम एव महद् यशयुक्तोऽस्ति।

अमूम् वाक्यमेव मुस्लिमधर्मावलम्बिनः सम्पूर्ण नमाजे वारं वारं (पुनः पुनः) अरबीभाषायाम् पुनरावृत्तिः करोति यत् अल्लाहो अकबर अर्थात् अल्लाहः एव अकबर अर्थात् महान् अस्ति।

वयं भारतीयाः स्मः तथा भारतीय संस्कृति युक्ताः स्मः। एतस्मात् कारणात् भारतस्य सनातन परम्परायाः निर्वहनं कुर्वन्नेव उभयोः ग्रन्थयोः अध्ययनं निष्ठापूर्वकेण कुर्मः।

**सन्दर्भवग्रन्र**

1. गीता. ३/७
2. गीता. २/५०
3. गीता. ४/२४
4. गीता. ३/२०
5. गीता. ७/२
6. गीता. /३८
7. गीता. ४/४१,४२
8. गीता. ४/३७
9. गीता.१२/१०,११
10. गीता.१२/१४
11. गीता.१२/२०
12. गीता.१२/६६

**Corresponding Author**

**Rajender Kumar Saini***

Research Scholar, Rashtriya Sanskrit Sansthan, Deemed University, Janak Puri, New Delhi

rajenderkv@gmail.com